# BK BIRLA CENTRE FOR EDUCATION

**SARALA BIRLA GROUP OF SCHOOLS**
**SENIOR SECONDARY| CO-ED DAY CUM BOYS' RESIDENTIAL SCHOOL**

B K BIRLA CENTRE FOR EDUCATION (Sarala Birla Group of Schools)

INDIAN PUBLIC SCHOOLS' CONFERENCE

## MID-TERM_EXAMINATION 2024-25

**SANSKRIT (119)**

Class : IX | Duration : 3 Hrs
Date : 23.09.2024 | Max. Marks : **80**
Admission No.: | Roll No.:

---

**सामान्य निर्देशाः –**

- कृपया सम्यकतया परीक्षणं कुर्वन्तु अस्मिन् प्रश्नपत्रे अष्टादश् प्रश्नाः सन्ति।
- उत्तर लेखनात् पूर्वं प्रश्नस्य क्रमांकः अवश्यमेव लेखनीयः।
- प्रश्नस्य क्रमांकः प्रश्नपत्रानुसारम् एव लेखनीयः।
- सर्वेषां प्रश्नानाम् उत्तराणि निर्देशानुसारं लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन पठनीयाः।

---

### (खण्ड क)

### अपठितावबोधनम् (10 अंकात्मकः)

**प्रश्न 01 अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**

(नीचे लिखे गद्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

दीपावलीपर्वणः भारते अतीव महत्त्वम् अस्ति। अस्मिन् दिवसे त्रेतायुगे मर्यादापुरुषोत्तमः श्रीरामचन्द्रः पितुः आज्ञां परिपालयन् चतुर्दशवर्षाणां वनवासं समाप्य राक्षसराजं रावणं हत्वा तस्य बन्धनात् स्वपत्नीं सीतां विमोच्य सीतया लक्ष्मणेन सह अयोध्यां नगरीं प्रत्यागतः। तदा च तस्य स्वागतं अयोध्यावासिनः रात्रौ दीपं प्रज्ज्वाल्य कृतवन्तः। तदारभ्य सम्पूर्णे भारते अस्मिन्नेवदिने प्रतिवर्षं स्वगृहेषु दीपमाला क्रियते।

जनाः सर्वत्र स्वच्छतां कुर्वन्ति, आपणेषु गृहेषु मार्गेषुसर्वत्र विद्युतदीपकैः तैलदीपकैः मोवर्तिकाभिश्च प्रकाशं कुर्वन्ति। प्रतीयते यत् – ''तमसो मा ज्योतिर्गमय'' इति प्रार्थनां सर्वत्र एव जनाः कुर्वन्ति। सर्वत्र जनानाम् आलस्यं दूरी भूत्वा पुरुषार्थस्य साम्राज्यं प्रसरति। सर्वेजनाः स्व–स्वगृहे महादेव्याः लक्ष्म्याः पूजनं कृत्वा तस्याः आशीर्वादं याचयन्ति। तत्पश्चात् मिष्ठान्नं वितरन्ति खादन्ति च। बालकाः युवानः च विस्फोटकानां विस्फोटनं कुर्वन्ति। एवं महापर्वणः दीपावल्याः भव्यरूपेण आयोजनं भवति।

**(अ) एकपदेन उत्तरत –** (केवलं प्रश्नद्वयम्) (1×2=2 अंकौ)

(1) रामः कं हत्वा स्वपत्नीं सीतां विमोचितवान् ?
(2) कुत्र दीपावल्याः अतीव महत्त्वम् अस्ति ?
(3) कस्मिन् युगे श्रीरामचन्द्रेण अवतारः गृहीतः ?

**(ब) पूर्णवाक्येन उत्तरत –** (केवलं प्रश्नद्वयम्) (2×2=4 अंकाः)

(1) सीतया लक्ष्मणेन सह रामः कदा अयोध्यां नगरीं प्रत्यागतः ?
(2) जनाः किं किं कुर्वन्ति ?
(3) बालकाः युवानः च किं कुर्वन्ति ?

**(स) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं संस्कृते लिखत।** (1×1=1 अंकः)

**(द) यथानिर्देशं उत्तरत – भाषा संबन्धी कार्य** (केवलं प्रश्नत्रयम्) (1×1=3 अंकाः)

(1) तदा च तस्य स्वागतं अयोध्यावासिनः कृतवन्तः। इति वाक्ये तस्य पदं कस्मै प्रयुक्तम् ?
(क) रामाय (ख) रावणस्य (ग) राज्ञः (घ) लोकाय

(2) जनाः सर्वत्र स्वच्छतां कुर्वन्ति। वाक्ये अव्ययपदं किम् ?
(क) जनाः (ख) सर्वत्र (ग) स्वच्छतां (घ) कुर्वन्ति

(3) दीपावल्याः भव्यरूपेण आयोजनं भवति। वाक्येस्मिन् विशेषणपदं किम् ?
(क) दीपावल्याः (ख) भव्यरूपेण (ग) आयोजनं (घ) भवति

(4) तस्य स्वागतं अयोध्यावासिनः **कृतवन्तः**। रेखांकिते पदे कः प्रत्ययः ?

(क) क्त्वा (ख) क्तः (ग) क्तवतु (घ) शानच्

**(खण्ड ख)**

**रचनात्मककार्यम् (15 अंकात्मकः)**

**प्रश्न 02 भवान् मनोजः/सौम्या भवतः/भवत्याः मित्रस्य/सख्याः सफलतां ज्ञात्वा तस्मै लिखिते वर्धापने पत्रे मंजूषापदेभ्यः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत – (1/2×10=5 अंकाः)**

भवान् मनोज/सौम्या आप अपने मित्र/सखी की सफलता के बारे में जानकर उनको लिखे पत्र में कोष्ठक में दिए पदों की सहायता से रिक्तस्थान भरकर उत्तरपुस्तिका में पुनः लिखिए–

रायपुरम्
दिनांकः

प्रिय (1) ––––––

(2) ––––––––

अहं कुशलः अस्मि, भवतः कुशलतायाः (3) ––––– करोमि। समाचारपत्रेण ज्ञातं यत् भवता दसवींकक्षायां (4) ––––– प्रथमम् स्थानं प्राप्तम्। एतत् ज्ञात्वा अहं (5) ––––– अस्मि। भवान् (6) ––––– फलं प्राप्तवान्। भवान् सज्जतायाम् एकं अपि क्षणं (7) ––––– न कृतवान्। तस्य परिश्रमस्य फलम् एव यत् भवान् प्रथमम स्थानं (8) –––––। मम पक्षात् शुभकामनाः स्वीकरोतु। भविष्ये एवम् एव (9) ––––– प्राप्नोतु इति मम शुभेच्छा। मातरं पितरं ज्येष्ठेभ्यः च चरणस्पर्शः (10) ––––– च स्नेहं ददातु।

भवतः अभिन्न मित्रम्
मनोज/सौम्या

| **मंजूषा** |
|---|
| प्रसन्नः, नमोनमः, परिश्रमस्य, कामनां, मित्रम्, महाराष्ट्रराज्ये, अनुजाय, सफलताम्, व्यर्थं, प्राप्तवान् |

**प्रश्न 03 'वृक्षाः–अस्माकं मित्राणि' इति विषयम् अधिकृत्य मंजूषातः शब्दान् चित्वा संस्कृतभाषया पंचवाक्यानि रचयत– (5 अंकाः)**

वृक्षाः–अस्माकं मित्राणि इस विषय पर कोष्ठक से शब्द चुनकर संस्कृतभाषा में पाँच वाक्य लिखिए–

| |
|---|
| **मंजूषा –** वृक्षाः, सत्पुरूषाः, कुर्वन्ति, परोपकाराय, भवन्ति, पशुपक्षिणां, गृहं, छायां, काष्ठं, पथिकेभ्यः, आतपं, प्राणवायुं, यच्छन्ति, सहन्ति। रक्षणं, धरायाः, कुर्वन्ति, संरक्षणम् |

**अथवा**

**चित्रं दृष्ट्वा मंजूषायाः सहायतया पंचवाक्यानि लिखत –**

चित्र को देखकर मंजूषा की सहायता से पाँच वाक्य लिखिए –

| **मंजूषा** |
|---|
| चित्रम्, वर्तते, अस्ति, वृद्धाश्रमस्य, भवनं, कुर्वन्ति, वृद्धाः, गच्छन्ति, अन्तः, वार्तालापं, सुंदरं, उभयतः, वृक्षः, मेघाः, आश्रमे, वातावरणं, शान्तं |



(1) ––––––––––––––––––––––––––––––

(2) ––––––––––––––––––––––––––––––

(3) ––––––––––––––––––––––––––––––

(4) ––––––––––––––––––––––––––––––

(5) ––––––––––––––––––––––––––––––

**प्रश्न 04 मंजूषायां दत्तैः शब्दैः कथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत –** (5अंकाः)

मंजूषा में दिए शब्दों के द्वारा कथा को पूर्ण करके उत्तर पुस्तिका में पुनः लिखिए –

**(1)** ––––––– गुरु द्रोणाचार्यः दुर्योधनम् **(2)** ––––––– आदिशत् – पुत्र! गच्छ नगरात् **(3)** ––––––– गुणवन्तं मनुष्यम् अन्विष्य आनय। दुर्योधनः **(4)** ––––––– असीत्। सः चिन्तितवान् मत्तः गुणयुक्तः अन्यः कोपि भवितुं न अर्हति अतः अन्वेषणस्य **(5)** ––––––– नास्ति। सः गुरोः समीपम् आगत्य अवदत् यत् नगरे कोपि **(6)** ––––––– मनुष्यः नास्ति। अनन्तरम् गुरूः युद्धिष्ठिरम् आहूय अवदत् – वत्स! **(7)** ––––––– गत्वा गुणहीनं पुरुषम् अन्विष्य आनय। युद्धिष्ठिरः सम्पूर्णं नगरं भ्रमित्वा गुरोः समीपम् आगत्य **(8)** ––––––– – यत् मत्तः गुणहीनः अस्मिन् नगरे कोपि नास्ति। आचार्य द्रोणः **(9)** –––––––आशिषम् अयच्छत् – पुत्र तव कीर्तिः कदापि न नक्ष्यति।

**केनापि सत्यमुक्तम् –यथा दृष्टिः (10) ––––––– सृष्टिः**

| **मंजूषा** |
|---|
| सर्वाधिकं, तथा, आहूय, आवश्यकता, एकदा, युद्धिष्ठिरम्, नगरं, अहंकारी, गुणवन्तः, अवदत् |

**अथवा**

**मंजूषातः उचितानि पदानि चित्वा संवादं प्रपूर्य उत्तरपुस्तिकायां पुनः लिखत –**

मंजूषा से उचित शब्द को चुनकर संवाद को पूर्ण करके उत्तर पुस्तिका में पुनः लिखिए –

रवीन्द्रः – भो नाविक! नक्षत्रविद्यां जानासि किम् ?

नाविकः – **(1)** ––––––––––––––

रवीन्द्रः – (हसन्) भो मुर्ख! तव जीवनस्य चतुर्थांशः नष्टः। गणितं पठितवान् किम् ?

नाविकः – **(2)** ––––––––––––––

रवीन्द्रः – अरे तव जीवनस्य अर्धं जातम्। (वृक्षपंक्तिः दृष्ट्वा) वृक्षविज्ञानं जानासि किम् ?

नाविकः – **(3)** –––––––––––––––

रवीन्द्रः – हा हन्त! तव जीवनस्य त्रिचतुर्थांशः व्यर्थः गतः।

नाविकः – **(4)** –––––––––––––––

रवीन्द्रः – भोः! एषा नौका तु दोलायते। जलमपि प्रविशति। किं करोमि। तरणं न जानामि।

नाविकः– **(5)** ––––––––––––––––

| **मंजूषा** |
|---|
| **(1)** गणनाम् एव जानामि न तु गणितम्। |
| **(2)** भोः कथं वृक्षविज्ञानं जानामि। कथमपि नौकां चालयामि। उदरंच भरामि। |
| **(3)** नहि नहि अहं तु प्रतिदिनं तारकाणि दृष्ट्वा नमामि। |
| **(4)** तरणं न जानासि नूनम् ? तर्हि नूनं तव सम्पूर्णमेव जीवनं नष्टम्। |
| **(5)** पश्यतु पश्यतु, प्रबलं वायुप्रकोपः उत्पन्नः। अहं तु कूर्दित्वा तरामि। |

## (खण्ड ग)

## अनुप्रयुक्तव्याकरणम् (28 अंकात्मकः)

**प्रश्न 05 सन्धिं सन्धिविच्छेदं वा कृत्वा रिक्तस्थानानि प्रपूर्य वाक्यानि लिखत –(पंच प्रश्नाः)(1×3=3 अंकाः)**

सन्धि और सन्धिविच्छेद करते हुए रिक्तस्थानों को भरकर वाक्यों को पूरा करके लिखिए।(5 प्रश्न)

(1) देवः **(देवालये)** ––– + ––– वसति।

(2) शिशुः **(शे+अनम्)** –––––– करोति।

(3) शब्दानां **(सम्+धिः)** –––––– करोतु।

(4) बालेभ्यः **(माता+छाया)** –––––– प्राप्तव्यम् एव।

(5) श्रावणे **(शिवोत्सवः)** ––– + ––– भवति।

**प्रश्न 06 समासं विग्रहं वा कृत्वा रिक्तस्थानानि प्रपूर्य वाक्यानि लिखत – (पंच प्रश्नाः) (1×3=3 अंकाः)**

समास/विग्रह करते हुए रिक्तस्थानों को भरकर वाक्यों को पूरा करके लिखिए – (5 प्रश्न)

(1) उद्याने **(राज्ञः पुत्राः)** ––––––– भ्रमन्ति।

(2) **(विद्यायाः आलयः)** –––––– अध्ययनाय भवति।

(3) **(शीतलं सलिलम्)** –––––– सवेभ्यः रोचते।

(4) छात्रः **(शास्त्रपरांगतः)** –––– –––– अस्ति।

(5) राजा **(वानरयूथम्)** ––– ––– भवति।

**प्रश्न 07 कोष्ठके दत्तं समयं संस्कृतेन विलिख्य वाक्य उत्तरपुस्तिकायां लिखत –(प्रश्नत्रयम्)(1×3=3अंकाः)**

कोष्टक में दिए समय को संस्कृत में लिखकर वाक्यों को उत्तरपुस्तिका में लिखिए।(तीन प्रश्न)

(1) गोपालदासः प्रातः **(5:15)** ––––––– वादने उत्तिष्ठति।

(2) सः प्रातः **(5:30)** –––––– वादने योगाभ्यासं करोति।

(3) सः **(6:15)** –––––– स्नानादिकं पूजनं व करोति।

(4) गोपालदासः **(8:45)** ––––––– वादने विद्यालयं गच्छति।

**प्रश्न 08 मंजूषायां दत्तैः उचितैः अव्ययपदैः रिक्त स्थानानि पूरयित्वा वाक्यानि लिखत – (1×4=4 अंकाः)**

कोष्टक में दिए उचित अव्ययपदों से रिक्तस्थानों को भरकर वाक्यों को पूरा करके लिखिए।

| **मंजूषा –** उच्चैः, अपि, इदानीम्, पुरा |
|---|

(1) मम पितामहः ––––––– वृद्धः अभवत्।

(2) चिकित्सालये –––––– न वक्तव्यम्।

(3) ––––––– शिक्षकेन यत् कथितम् तत् उचितम् एव कथितम्।

(4) त्वम् ––––––– स्वकार्यं कुरु।

**प्रश्न 09 प्रकृति प्रत्ययं योजयित्वा उचितम् उत्तरं चिनुत – (पंचप्रश्नाः) (1×4=4 अंकाः)**

प्रत्यय और मूल शब्दों को जोड़कर उचित उत्तर चुनकर लिखिए (कोई पाँच)

(1) छात्रः **(धाव्+क्त्वा)** ––––– विद्यालयं गच्छति।

**(क)** धावितुम् **(ख)** धावनाय **(ग)** धावितः **(घ)** धावित्वा

(2) बालकः कन्दुकं **(नी+तुमुन्)** ––––– भण्डारगृहं गच्छति।

**(क)** नीतः **(ख)** नेतुम् **(ग)** नीतवान् **(घ)** नीयमानः

(3) प्रमोदः पितरं **(सेव्+शानच्)** ––––– प्रसन्नः अस्ति।

**(क)** सेवन् **(ख)** सेवमानः **(ग)** सेवितः **(घ)** सेवनीयः

(4) छात्रेण कार्यं **(कृ+क्त)** –––––।

**(क)** कृतः **(ख)** कृतवान् **(ग)** कर्तुम् **(घ)** कुर्वन्

(5) माता पुत्रस्य वचनं **(श्रुत्+क्तवतु)** ––––– ।

**(क)** श्रुता **(ख)** श्रृण्न्ती **(ग)** श्रुतवती **(घ)** श्रृणोति

(6) छात्रः विद्यालयं **(गम्+शतृ)** ––––– क्रीडां करोति।

**(क)** गम्यमानः **(ख)** गत्वा **(ग)** गच्छन् **(घ)** गन्तुम्

**प्रश्न 10 उचितां विभक्तिं चित्वा वाक्यानि प्रपूर्य उत्तरपुस्तिकायां पुनः लिखत्–(प्रश्नचतुष्टयं)(1×4=4अंकाः)**

निर्देश के अनुसार उचित उत्तर चुनकर लिखिए (कोई चार)

**(1)** ––– निरन्तरम् पाठं पठति।

**(क)** छात्रेण **(ख)** छात्रः **(ग)** छात्राः **(घ)** छात्रौ

**(2)** वृक्षः –––––– फलानि यच्छन्ति।

**(क)** परोपकारः **(ख)** परोपकारस्य **(ग)** परोपकाराय **(घ)** परोपकारेण

**(3)** सीता ––––––– सह वनं गतवती।

**(क)** रामम् **(ख)** रामाय **(ग)** रामेण **(घ)** रामः

**(4)** मनोहरः –––––– एव खादति।

**(क)** रोटिकाम् **(ख)** रोटिकया **(ग)** रोटिकाभिः **(घ)** रोटिकायै

**(5)** महर्षि वाल्मीकिना –––––– लिखितः।

**(क)** ग्रन्थाय **(ख)** ग्रन्थम् **(ग)** ग्रन्थेन **(घ)** ग्रन्थः

**प्रश्न 11 निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत – (प्रश्नचतुष्टयम्) (1×4=4 अंकाः)**

निर्देश के अनुसार उचित उत्तर चुनकर लिखिए (कोई चार)

**(1) बालक** शब्दस्य षष्ठी विभक्तिः एकवचनम् किम् ?

**(क)** बालकः **(ख)** बालकस्य **(ग)** बालकेन **(घ)** बालके

**(2) नदी** शब्दस्य सप्तमी विभक्तिः बहुवचनम् किम् ?

**(क)** नदीम् **(ख)** नद्याम् **(ग)** नद्योः **(घ)** नदीसु

**(3) भवान्** पुल्लिंगशब्दस्य षष्ठी विभक्तिः द्विवचनम् किम् ?

**(क)** भवतः **(ख)** भवतोः **(ग)** भवताम् **(घ)** अस्माकम्

**(4) तत्** स्त्रीलिंगशब्दस्य द्वितीया विभक्तिः बहुवचनम् किम् ?

**(क)** ताम् **(ख)** ते **(ग)** ताः **(घ)** तयोः

**(5) अस्मद्** शब्दस्य तृतीया विभक्तिः बहुवचनम् किम् ?

**(क)** मया **(ख)** आवाभ्याम् **(ग)** अस्मभ्यम् **(घ)** अस्माभिः

**प्रश्न 12 निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत – (प्रश्नत्रयम्) (1×3=3 अंकाः)**

निर्देश के अनुसार उचित उत्तर चुनकर लिखिए (कोई चार)

**(1) श्रृ** धातोः लट्लकारस्य वर्तमानकालस्य उत्तमपुरुषस्य द्विवचनम् किम् ?

**(क)** पठतः **(ख)** पठावः **(ग)** पठामि **(घ)** पठथः

**(2) पठ्** धातोः लङ्लकारस्य भूतकालस्य अन्यपुरुषस्य एकवचनम् किम् ?

**(क)** अपठत् **(ख)** अपठन् **(ग)** अपठः **(घ)** अपठम्

**(3) कृ** धातोः लृट्लकारस्य भविष्यकालस्य उत्त्मपुरुषस्य द्विवचनम् किम् ?

**(क)** करिष्यामि **(ख)** करिष्यथः **(ग)** करिष्यतः **(घ)** करिष्यावः

**(4) लिख्** धातोः लोट्लकारस्य आज्ञार्थकस्य मध्ययमपुरुषस्य एकवचनम् किम् ?

**(क)** लिख **(ख)** लिखतु **(ग)** लिखताम् **(घ)** लिखन्तु

**(5) पच्** धातोः विधिलिङ्लकारस्य कामनार्थकस्य उत्तमपुरुषस्य एकवचनम् किम् ?

**(क)** पचेयम् **(ख)** पचेव **(ग)** पचेम **(घ)** पचेत्

## (खण्ड घ)
## पठितावबोधनम् (27 अंकात्मकः)

**प्रश्न 13 अधोलिखितं नाट्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**

(नीचे लिखे नाट्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

**प्रतापः** – धिङ् माम् अधन्यम्, योऽहं मातृभूमिं रक्षितुम् असमर्थः। अलं मम एतेन जीवितेन। (दीर्घः निःश्वसति)

(यावत् सहचराः तस्य आकृतिं दृष्ट्वा व्याकुलाः भवन्ति, तावदेव सहसा प्रविशति कश्चित् मेवाडराजपुत्रः)

राजपुत्रः – (राजोचितं प्रणम्य) विजयताम् महाराजः, विजयताम्

प्रतापः – (समाश्वस्य) अयि भ्रातः कथं जयघोषं कृत्वा मां लज्जयसे ?

राजपुत्रः – देव! कथं भवान् वदति एवम् ? किं न खलु कृतं भवता राज्यत्राणाय ? स्वदेशं स्वाधीनं कर्तुं भवता किं न सोढम् ? विजेष्यते ननु भवान्!

प्रतापः – कुतस्तावत् विजयः! स्वदेशमेव त्यक्तुं तत्परोऽहम्।

भटः – (अंजलिं बद्ध्वा) महाराज! नैवं तावत्। स्वामिभाग्यानाम् अनुगन्तारः वयम्। वयं सर्वे त्वां अनुगमिष्यामः।

प्रतापः – एवं न वक्तव्यम्। कृतज्ञोऽस्मि भवताम् अहम्। धीरैः वीरैः बहु उपकृतः देशस्य। स्वदेशे भवद्भिः देशस्य स्वतंत्रतायै प्रयत्नः समाधेयः।

सर्वे भटाः–देशरक्षायै बद्धपरिकराः वयं तु भवन्तमेव अनुसरिष्यामः।

प्रतापः – यथा रोचते भवद्भ्यः। प्रदेशोऽयं अस्माभिः त्याज्यः एव।

**(अ) एकपदेन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1/2×2=1 अंकः)**

(1) कः मातृभूमिं रक्षितुम् असमर्थः ?

(2) केषाम् अनुगन्तारः वयम्?

(3) देशरक्षायै बद्धपरिकराः के ?

**(ब) पूर्णवाक्येन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1×2=2 अंकौ)**

(1) कैः बहु उपकृतः देशस्य ?

(2) भवद्भिः कस्यै प्रयत्नः समाधेयः ?

(3) सहसा कः प्रविशति कश्चित् ?

**(स) यथानिर्देशं उत्तरत –** **(1×2=2 अंकाः)**

(1) कृतज्ञोऽस्मि भवताम् अहम्। वाक्येस्मिन् क्रियापदं किम् ?

**(क)** कृतज्ञः **(ख)** अस्मि **(ग)** भवताम् **(घ)** अहम्

(2) <u>स्वामिभाग्यानाम्</u> अनुगन्तारः वयम्। रेखांकिते शब्दे का विभक्तिः अस्ति ?

**(क)** प्रथमा **(ख)** तृतीया **(ग)** चतुर्थी **(घ)** षष्ठी

**प्रश्न 14 अधोलिखितं पद्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**

(नीचे लिखे पद्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

गौरवं प्राप्यते दानात् न तु वित्तस्य संचयात्।
स्थितिरुच्चैः पयादानां पयोदीनामधः स्थितिः।।

**(अ) एकपदेन उत्तरत –** (केवलमेकंप्रश्नम्) **(1×1=1 अंकः)**

(1) गौरवं कस्मात् प्राप्यते ?

(2) वित्तस्य संचयात कः नष्टः भवति ?

**(ब) पूर्णवाक्येन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1×2=2 अंकौ)**

(1) केषां स्थितिः उच्चैः भवति ?

(2) केषां स्थितिः अधः भवति ?

**(स) यथानिर्देशं उत्तरत –** **(1×2=2 अंकौ)**

(1) पयोदीनामधः स्थितिः। वाक्येस्मिन् अव्ययपदं किम् ?

(क) पयोदीनाम् (ख) अधः (ग) स्थितिः (घ) सम्पूर्ण

(2) **धनस्य** इत्यर्थे किं पदं श्लोके प्रयुक्तम् ?

(क) दानस्य (ख) पयोदस्य (ग) वित्तस्य (घ) गौरवस्य

**प्रश्न 15 अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**

(नीचे लिखे गद्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

आसीत् पुरा कोऽपि महातपा नाम वनवासी मुनिः। एकदा यदा सः तरुच्छायोपविष्टः आसीत् तदा तस्योपरि बलाका विष्टां उत्सृजत्। स च क्रुद्धस्तां व्यलोकयत्। दृष्टमात्रा एव बलाका भस्मसाद् अभवत्। ततश्च सः मुनिः तपः प्रभावात् अहंकारम् उपगतः।

एकदा अयं मुनिः क्वापि नगरे एकं ब्राह्मणगृहं प्राप्य तद्गृहिणीं भिक्षाम् अयाचत्। सा पतिव्रता गृहिणी तमवदत् – 'प्रतीक्षस्व क्षणं यावत् भर्तुः परिचर्यां समापये' इति। एतत् श्रुत्वा स मुनिः तां कोपदृष्ट्या दृष्टवान्। सा विहस्य अभाषत् – 'मुने! न अहं बालकेति'। तत् आकर्ण्य विस्मितः मुनिः 'एतत् कथमिव ज्ञातमनया' इति विचिन्तयन् तत्र उपाविशत्।

ततश्च साध्वी भर्तुः शुश्रूषां कृत्वा भिक्षामादाय मुनेः अन्तिकम् आगता। स च मुनिः बद्धांजलिः तामवदत् – 'कथं त्वया अन्यगोचरो बलाका वृत्तान्तो ज्ञातः इति ब्रूहि, ततो भिक्षां ग्रहीष्ये'। साऽवदत् – 'मुने! न भर्तृसेवया अपरं कंचन् धर्मं करोम्यहम्।

**(अ) एकपदेन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1/2×2=1 अंकः)**

(1) को नाम मुनिः आसीत् । ?

(2) मुनिः कस्मात् अहंकारम् उपगतः?

(3) मुनिः बलाकां कथं व्यलोकयत् ?

**(ब) पूर्णवाक्येन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1×2=2 अंकौ)**

(1) कदा बलाका विष्टां उत्सृजत ?

(2) दृष्टमात्रा एव किम् अभवत् ?

(3) साध्वी कदा मुनेः अन्तिकम् आगता। ?

**(स) यथानिर्देशं उत्तरत –** **(1×2=2 अंकौ)**

(1) 'कथं त्वया अन्यगोचरो बलाका वृत्तान्तो ज्ञातः इति ब्रूहि। वाक्ये अव्ययपदं किम् ?

(क) अन्यगोचरो (ख) वृत्तान्तो (ग) ज्ञातः (घ) इति

(2) 'साधुः' इत्यस्य किं विलोमपदं गद्यांशे प्रयुक्तम् –

(क) शुश्रूषा (ख) मुनिः (ग) साध्वी (घ) बलाका

**प्रश्न 16 रेखांकितान् शब्दान् आधृत्य प्रश्ननिर्माणं कुरुत – (पंच प्रश्नाः)** **(1×5=5 अंकाः)**

(रेखांकित शब्दों के आधार पर प्रश्ननिर्माण कीजिए) (कोई पाँच)

(क) ब्राह्मणः **दारिद्रयात्** अचिन्तयत्।

(ख) **ऐश्वर्यस्य** विभूषणं सुजनता।

(ग) सर्वेभटाः **देशरक्षायै** बद्धपरिकराः आसन्।

(घ) राजा **पुत्राणाम्** आचारहीनतया उद्विग्नमनाः आसीत्।

(ङ) **धर्मव्याधः** मातापित्रोः भक्तः आसीत्।

(च) **हितोपदेशः** नीतिकथानां संकलनमेव।

**प्रश्न 17 प्रदत्तस्य श्लोकस्य अन्वयं प्रपूर्य लिखत –** **(2 अंकौ)**

(दिए श्लोक के अन्वय में रिक्तस्थान भरकर उत्तर पुस्तिका में लिखिए)

काष्ठादग्निर्जायते मथ्यमानात्, भूमिस्तोयं खन्यमाना ददाति।
सोत्साहानां नास्त्यसाध्यं नराणां, मार्गारब्धाः सर्वयत्नाः फलन्ति।।

**अन्वयः–** —————— काष्ठात् अग्निः जायते। खन्यमाना ———— ———— ददाति।

——————— नराणाम् असाध्यं ——————। मार्गे आरब्धाः सर्व —————— फलन्ति।

**प्रश्न 18 घटनाक्रमानुसारं वाक्यानि पुस्तिकायां लिखत –** **(5 अंकाः)**

(घटना को क्रम के अनुसार उत्तर पुस्तिका में लिखिए)

**(क)** ब्राह्मणः नकुलं बालरक्षार्थं व्यवस्थाप्य गच्छति।

**(ख)** उज्जयिन्यां माधवो नाम विप्रः वसति।

**(ग)** ब्राह्मणः श्राद्धं गृहीत्वा प्रत्यागच्छत्।

**(घ)** ब्राह्मणः श्राद्धार्थं राज्ञा निमंत्रितः भवति।

**(ङ)** ब्राह्मणः श्राद्धार्थं राज्ञः प्रासादं गच्छति।

**(च)** नकुलः बालकस्य समीपं आगच्छन्तं सर्पं मारयति।

**(छ)** ब्राह्मणः सुस्थं पुत्रं दृष्ट्वा विषादमनुभवति।

**(ज)** नकुलस्य मुखं रक्तविलिप्तं भवति।

**(झ)** ब्राह्मणः रक्तविलिप्तमुखं नकुलं दृष्ट्वा चिन्तयति – 'नूनं खादितः मे पुत्रः अनेन नकुलेन।'

**(ञ)** सहसा क्रियां न विद्धीत्।